# SHRIMAD BHAGWAT RASIK KUTUMBA

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## Uddhav Geeta, Third Sopan(11.16)



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ षोडशोऽध्यायः॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Ekādaśḥ skandhaḥ**

**.. atha ṣoḍaśo'dhyāyaḥ ..**

### उद्धव उवाच

**त्वं(म्) ब्रह्म परमं(म्) साक्षा - दनाद्यन्तमपावृतम् ।**
**सर्वेषामपि भावानां(न्), त्राणस्थित्यप्ययोद्भवः ॥ 1॥**

uddhava uvāca

tvaṃ(m) brahma paramaṃ(m) sākṣā- danādyantamapāvṛtam .

sarveṣāmapi bhāvānāṃ(n), trāṇasthityapyayodbhavaḥ .. 1..

danā+ dyanta+ mapāvṛtam, trāṇas+thityap+ yayod+ bhavaḥ

उच्चावचेषु भूतेषु, दुर्ज्ञेयमकृतात्मभिः ।

उपासते त्वां(म्) भगवन्, याथातथ्येन ब्राह्मणाः ॥ 2॥

uccāvaceṣu bhūteṣu, durjñeyamakṛtātmabhiḥ .

upāsate tvāṃ(m) bhagavan, yāthātathyena brāhmaṇāḥ .. 2..

durjñeya+ makṛtāt+ mabhiḥ

येषु येषु च भावेषु, भक्त्या त्वां(म्) परमर्षयः ।

उपासीनाः(फ्) प्रपद्यन्ते, सं(व्)सिद्धिं(न्) तद् वदस्व मे ॥ 3॥

yeṣu yeṣu ca bhāveṣu, bhaktyā tvāṃ(m) paramarṣayaḥ .

upāsīnāḥ(ph) prapadyante, saṃ(v)siddhiṃ(n) tad vadasva me .. 3..

paramar+ ṣayaḥ

गूढश्चरसि भूतात्मा,भूतानां(म्) भूतभावन ।

न त्वां(म्) पश्यन्ति भूतानि, पश्यन्तं(म्) मोहितानि ते ॥ 4॥

gūḍhaścarasi bhūtātmā, bhūtānāṃ(m) bhūtabhāvana .

na tvāṃ(m) paśyanti bhūtāni, paśyantaṃ(m) mohitāni te .. 4..

gūḍhaś+ carasi

याः(ख्) काश्च भूमौ दिवि वै रसायां(म्),

विभूतयो दिक्षु महाविभूते ।

ता मह्यमाख्याह्यनुभावितास्ते,

नमामि ते तीर्थपदाङ्घ्रिपद्मम् ॥ 5॥

yāḥ(kh) kāśca bhūmau divi vai rasāyāṃ(m)

vibhūtayo dikṣu mahāvibhūte .

tā mahyamākhyāhyanubhāvitāste

namāmi te tīrthapadāṅghripadmam .. 5..

mahya+ mākhyā+ hyanubhā+ vitāste, tīrtha+ padāṅghri+ padmam

श्रीभगवानुवाच

एवमेतदहं(म्) पृष्टः(फ्), प्रश्नं(म्) प्रश्नविदां(म्) वर ।

युयुत्सुना विनशने , सपत्नैरर्जुनेन वै ॥ 6॥

śrībhagavānuvāca

evametadahaṃ(m) pṛṣṭaḥ(ph), praśnaṃ(m) praśnavidāṃ(m) vara .

yuyutsunā vinaśane, sapatnairarjunena vai .. 6..

sapatnai+ rar+ junena

ज्ञात्वा ज्ञातिवधं(ङ्) गर्ह्य- मधर्मं(म्) राज्यहेतुकम् ।

ततो निवृत्तो हन्ताहं(म्), हतोऽयमिति लौकिकः ॥ 7॥

jñātvā jñātivadhaṃ(ṅ) garhya- madharmaṃ(m) rājyahetukam .

tato nivṛtto hantāhaṃ(m), hato'yamiti laukikaḥ .. 7..

rājya+ hetukam

स तदा पुरुषव्याघ्रो, युक्त्या मे प्रतिबोधितः ।

अभ्यभाषत मामेवं(म्),यथा त्वं(म्) रणमूर्धनि ॥ 8॥

sa tadā puruṣavyāghro, yuktyā me pratibodhitaḥ .

abhyabhāṣata māmevaṃ(m), yathā tvaṃ(m) raṇamūrdhani .. 8..

puruṣav+ yāghro

अहमात्मोद्धवामीषां(म्),भूतानां(म्) सुहृदीश्वरः ।

अहं(म्) सर्वाणि भूतानि , तेषां(म्) स्थित्युद्भवाप्ययः।।9।।

ahamātmoddhavāmīṣāṃ(m), bhūtānāṃ(m) suhṛdīśvaraḥ .

ahaṃ(m) sarvāṇi bhūtāni, teṣāṃ(m) sthityudbhavāpyayaḥ .. 9..

ahamāt+ mod+ dhavāmīṣāṃ(m),

sthityud+ bhavāpyayaḥ

अहं(ङ्) गतिर्गतिमतां(ङ्),कालः(ख्) कलयतामहम् ।

गुणानां(ञ्) चाप्यहं(म्) साम्यं(ङ्),गुणिन्यौत्पत्तिको गुणः ॥ 10॥

ahaṃ(ṅ) gatirgatimatāṃ(ṅ), kālaḥ(kh) kalayatāmaham .

guṇānāṃ(ñ) cāpyahaṃ(m) sāmyaṃ(ṅ), guṇinyautpattiko guṇaḥ .. 10..

guṇinyaut+ pattiko

गुणिनामप्यहं(म्) सूत्रं(म्),महतां(ञ्) च महानहम् ।

सूक्ष्माणामप्यहं(ञ्) जीवो, दुर्जयानामहं(म्) मनः ॥ 11॥

guṇināmapyahaṃ(m) sūtraṃ(m), mahatāṃ(ñ) ca mahānaham .

sūkṣmāṇāmapyahaṃ(ñ) jīvo, durjayānāmahaṃ(m) manaḥ .. 11..

sūkṣmāṇā+ mapyahaṃ(ñ)

हिरण्यगर्भो वेदानां(म्),मन्त्राणां(म्) प्रणवस्त्रिवृत् ।

अक्षराणामकारोऽस्मि, पदानिच्छन्दसामहम् ॥ 12॥

hiraṇyagarbho vedānāṃ(m), mantrāṇāṃ(m) praṇavastrivṛt .

akṣarāṇāmakāro'smi, padānicchandasāmaham .. 12..

praṇavas+ trivṛt, padānic+chanda+ sāmaham

इन्द्रोऽहं(म्) सर्वदेवानां(म्), वसूनामस्मि हव्यवाट् ।

आदित्यानामहं(म्) विष्णू, रुद्राणां(न्) नीललोहितः ॥ 13॥

indro'haṃ(m) sarvadevānāṃ(m), vasūnāmasmi havyavāṭ .

ādityānāmahaṃ(m) viṣṇū, rudrāṇāṃ(n) nīlalohitaḥ .. 13..

vasūnā+ masmi

ब्रह्मर्षीणां(म्) भृगुरहं(म्), राजर्षीणामहं(म्) मनुः ।
देवर्षीणां(न्) नारदोऽहं(म्), हविर्धान्यस्मि धेनुषु ॥ 14॥

brahmarṣīṇāṃ(m) bhṛguraham(m), rājarṣīṇāmahaṃ(m) manuḥ .
devarṣīṇāṃ(n) nārado'haṃ(m), havirdhānyasmi dhenuṣu .. 14..

rājarṣī+ ṇāmahaṃ(m), havir+ dhānyasmi

सिद्धेश्वराणां(ङ्) कपिलः(स्), सुपर्णोऽहं(म्) पतत्त्रिणाम् ।
प्रजापतीनां(न्) दक्षोऽहं(म्), पितृणामहमर्यमा ॥ 15॥

siddheśvarāṇāṃ(ṅ) kapilaḥ(s), suparṇo'haṃ(m) patattriṇām .
prajāpatīnāṃ(n) dakṣo'haṃ(m), pitṝṇāmahamaryamā .. 15..

siddheś+ varāṇāṃ(ṅ), patat+ triṇām ,pitṝṇā+ mahamar+ yamā

मां(म्) विद्ध्युद्धव दैत्यानां(म्),प्रह्लादमसुरेश्वरम् ।
सोमं(न्) नक्षत्रौषधीनां(न्), धनेशं(म्) यक्षरक्षसाम् ॥ 16॥

māṃ(m) viddhyuddhava daityānāṃ(m), prahlādamasureśvaram .
somaṃ(n) nakṣatrauṣadhīnāṃ(n), dhaneśaṃ(m) yakṣarakṣasām .. 16..

vid+ dhyud+ dhava, prahlā+ dama+ sureśvaram

ऐरावतं(ङ्) गजेन्द्राणां(म्), यादसां(म्) वरुणं(म्) प्रभुम् ।
तपतां(न्) द्युमतां(म्) सूर्यं(म्), मनुष्याणां(ञ्) च भूपतिम् ॥ 17॥

airāvataṃ(ṅ) gajendrāṇāṃ(m), yādasāṃ(m) varuṇaṃ(m) prabhum .
tapatāṃ(n) dyumatāṃ(m) sūryaṃ(m), manuṣyāṇāṃ(ñ) ca bhūpatim .. 17..

उच्चैः(श्)श्रवास्तुरं(ङ्)गाणां(न्), धातूनामस्मि कां(ञ्)चनम् ।
यमः(स्) सं(य्)यमतां(ञ्) चाहं(म्), सर्पाणामस्मि वासुकिः ॥ 18॥

uccaiḥ(ś)śravāsturaṃ(ṅ)gāṇāṃ(n), dhātūnāmasmi kāṃ(ñ)canam .
yamaḥ(s) saṃ(y)yamatāṃ(ñ) cāhaṃ(m), sarpāṇāmasmi vāsukiḥ .. 18..

uccaiḥ(ś)+ śravās+ turaṃ(ṅ)+ gāṇāṃ(n)

नागेन्द्राणामनन्तोऽहं(म्),मृगेन्द्रः(श्) शृं(ङ्)गिदं(व्)ष्ट्रिणाम् ।
आश्रमाणामहं(न्) तुर्यो, वर्णानां(म्) प्रथमोऽनघ ॥ 19॥

nāgendrāṇāmananto'haṃ(m), mṛgendraḥ(ś) śṛṃ(ṅ)gidaṃ(v)ṣṭriṇām .
āśramāṇāmahaṃ(n) turyo, varṇānāṃ(m) prathamo'nagha .. 19..

nāgendrāṇā+ mananto'haṃ(m),

śṛṃ(ṅ)gi+ daṃ(v)ṣṭriṇām

तीर्थानां(म्) स्रोतसां(ङ्) गङ्गा, समुद्रः(स्) सरसामहम् ।
आयुधानां(न्) धनुरहं(न्),त्रिपुरघ्नो धनुष्मताम् ॥ 20॥

tīrthānāṃ(m) srotasāṃ(ṅ) gaṅgā, samudraḥ(s) sarasāmaham .
āyudhānāṃ(n) dhanurahaṃ(n), tripuraghno dhanuṣmatām .. 20..

tripu+ raghno

धिष्ण्यानामस्म्यहं(म्) मेरुर्- गहनानां(म्)हिमालयः ।
वनस्पतीनामश्वत्थ, ओषधीनामहं(म्) यवः ॥ 21॥

dhiṣṇyānāmasmyahaṃ(m) merur- gahanānāṃ(m) himālayaḥ .
vanaspatīnāmaśvattha, oṣadhīnāmahaṃ(m) yavaḥ .. 21..

dhiṣṇyā+ nāmas+ myahaṃ(m),

vanaspatīnā+ maśvattha

पुरोधसां(म्) वसिष्ठोऽहं(म्), ब्रह्मिष्ठानां(म्) बृहस्पतिः ।
स्कन्दोऽहं(म्) सर्वसेनान्या- मग्रण्यां(म्) भगवानजः ॥ 22॥

purodhasāṃ(m) vasiṣṭho'haṃ(m), brahmiṣṭhānāṃ(m) bṛhaspatiḥ .
skando'haṃ(m) sarvasenānyā- magraṇyāṃ(m) bhagavānajaḥ .. 22..

brahmiṣ+ ṭhānāṃ(m)

यज्ञानां(म्) ब्रह्मयज्ञोऽहं(म्), व्रतानामविहिं(व्)सनम् ।
वाय्वग्न्यर्काम्बुवागात्मा, शुचीनामप्यहं(म्) शुचिः ॥ 23॥

yajñānāṃ(m) brahmayajño'haṃ(m), vratānāmavihiṃ(v)sanam .

vāyvagnyarkāmbuvāgātmā, śucīnāmapyahaṃ(m) śuciḥ .. 23..

vratānā+ mavihiṃ(v)+ sanam, vāy+ vagnyar+ kāmbuvā+ gātmā,

śucīnā + mapyahaṃ(m)

योगानामात्मसं(व्)रोधो, मन्त्रोऽस्मि विजिगीषताम् ।

आन्वीक्षिकी कौशलानां(म्), विकल्पः(ख्) ख्यातिवादिनाम् ॥ 24॥

yogānāmātmasaṃ(v)rodho, mantro'smi vijigīṣatām .

ānvīkṣikī kauśalānāṃ(m), vikalpaḥ(kh) khyātivādinām .. 24..

yogānā+ mātma+ saṃ(v)rodho, vijigī+ ṣatām

स्त्रीणां(न्) तु शतरूपाहं(म्),पुं(व्)सां(म्) स्वायम्भुवो मनुः ।

नारायणो मुनीनां(ञ्) च, कुमारो ब्रह्मचारिणाम् ॥ 25॥

strīṇāṃ(n) tu śatarūpāhaṃ(m), puṃ(v)sāṃ(m) svāyambhuvo manuḥ .

nārāyaṇo munīnāṃ(ñ) ca, kumāro brahmacāriṇām .. 25..

śata+ rūpāhaṃ(m)

धर्माणामस्मि सं(न्)न्यासः(ह्), क्षेमाणामबहिर्मतिः ।

गुह्यानां(म्) सूनृतं(म्) मौनं(म्), मिथुनानामजस्त्वहम् ॥ 26॥

dharmāṇāmasmi san(n)nyāsaḥ(h), kṣemāṇāmabahirmatiḥ .

guhyānāṃ(m) sūnṛtaṃ(m) maunaṃ(m), mithunānāmajastvaham .. 26..

kṣemāṇā+ mabahir+ matiḥ, mithunānā+ majas+ tvaham

सं(व्)वत्सरोऽस्म्यनिमिषा- मृतूनां(म्) मधुमाधवौ ।

मासानां(म्) मार्गशीर्षोऽहं(न्), नक्षत्राणां(न्) तथाभिजित् ॥ 27॥

saṃ(v)vatsaro'smyanimiṣā- mṛtūnāṃ(m) madhumādhavau .

māsānāṃ(m) mārgaśīrṣo'haṃ(n), nakṣatrāṇāṃ(n) tathābhijit .. 27..

saṃ(v)vatsaro'+ smyanimiṣā

अहं(म्) युगानां(ञ्) च कृतं(न्), धीराणां(न्) देवलोऽसितः ।
द्वैपायनोऽस्मि व्यासानां(ङ्), कवीनां(ङ्) काव्य आत्मवान् ॥ 28॥

aham(m) yugānām(ñ) ca kṛtam(n), dhīrāṇām(n) devalo'sitaḥ .
dvaipāyano'smi vyāsānām(ṅ), kavīnām(ṅ) kāvya ātmavān .. 28..

dvaipā+ yano'smi

वासुदेवो भगवतां(न्), त्वं(न्) तु भागवतेष्वहम् ।
किं(म्)पुरुषाणां(म्) हनुमान्, विद्याध्राणां(म्) सुदर्शनः ॥ 29॥

vāsudevo bhagavatām(n), tvam(n) tu bhāgavateṣvaham .
kim(m)puruṣāṇām(m) hanumān, vidyādhrāṇām(m) sudarśanaḥ .. 29..

bhāgavateṣ+ vaham

रत्नानां(म्) पद्मरागोऽस्मि, पद्मकोशः(स्) सुपेशसाम् ।
कुशोऽस्मि दर्भजातीनां(ङ्), गव्यमाज्यं(म्) हविः(ष्)ष्वहम् ॥ 30॥

ratnānām(m) padmarāgo'smi, padmakośaḥ(s) supeśasām .
kuśo'smi darbhajātīnām(ṅ), gavyamājyam(m) haviḥ(ṣ)ṣvaham .. 30..

padma+ rāgo'smi

व्यवसायिनामहं(म्) लक्ष्मीः(ख्), कितवानां(ञ्) छलग्रहः ।
तितिक्षास्मि तितिक्षूणां(म्), सत्त्वं(म्) सत्त्ववतामहम् ॥ 31॥

vyavasāyināmaham(m) lakṣmīḥ(kh), kitavānām(ñ) chalagrahaḥ .
titikṣāsmi titikṣūṇām(m), sattvam(m) sattvavatāmaham .. 31..

vyavasā+ yināmaham(m),

sattva+ vatāmaham

ओजः(स्) सहो बलवतां(ङ्),कर्माहं(म्) विद्धि सात्त्वताम् ।
सात्त्वतां(न्) नवमूर्तीना- मादिमूर्तिरहं(म्) परा ॥ 32 ॥

ojaḥ(s) saho balavatāṃ(ṅ), karmāhaṃ(m) viddhi sātvatām .

sātvatāṃ(n) navamūrtīnā- mādimūrtirahaṃ(m) parā .. 32..

mādi+ mūrti+ rahaṃ(m)

विश्वावसुः(फ्) पूर्वचित्तिर्-गन्धर्वाप्सरसामहम् ।

भूधराणामहं(म्) स्थैर्यं(ङ्), गन्धमात्रमहं(म्) भुवः ॥ 33॥

viśvāvasuḥ(ph) pūrvacittir- gandharvāpsarasāmaham .

bhūdharāṇāmahaṃ(m) sthairyaṃ(ṅ), gandhamātramahaṃ(m) bhuvaḥ .. 33..

gandhar+ vāp+ sarasāmaham, gandhamātra+ mahaṃ(m)

अपां(म्) रसश्च परमस्- तेजिष्ठानां(म्) विभावसुः ।

प्रभा सूर्येन्दुताराणां(म्),शब्दोऽहं(न्) नभसः(फ्) परः ॥ 34॥

apāṃ(m) rasaśca paramas- tejiṣṭhānāṃ(m) vibhāvasuḥ .

prabhā sūryendutārāṇāṃ(m), śabdo'haṃ(n) nabhasaḥ(ph) paraḥ .. 34..

sūryendu+ tārāṇāṃ(m)

ब्रह्मण्यानां(म्) बलिरहं(म्), वीराणामहमर्जुनः ।

भूतानां(म्) स्थितिरुत्पत्ति- रहं(म्) वै प्रतिसङ्क्रमः ॥ 35॥

brahmaṇyānāṃ(m) baliraham(m), vīrāṇāmahamarjunaḥ .

bhūtānāṃ(m) sthitirutpatti- rahaṃ(m) vai pratisaṅkramaḥ .. 35..

vīrāṇā+ mahamarjunaḥ, sthiti+ rutpatti

गत्युक्त्युत्सर्गोपादान- मानन्दस्पर्शलक्षणम् ।

आस्वादश्रुत्यवघ्राण- महं(म्) सर्वेन्द्रियेन्द्रियम् ॥ 36॥

Gatyuktyutsargopādāna- mānandasparśalakṣaṇam .

āsvādaśrutyavaghrāṇa- mahaṃ(m) sarvendriyendriyam .. 36..

Gat+ yuk+ tyut+ sargopādāna,

mānanda+ sparśa+ lakṣaṇam

पृथिवी वायुराकाश, आपो ज्योतिरहं(म्) महान् ।
विकारः(फ्) पुरुषोऽव्यक्तं(म्), रजः(स्) सत्त्वं(न्) तमः(फ्) परम् ।।37।।

pṛthivī vāyurākāśa, āpo jyotirahaṃ(m) mahān .
vikārah(ph) puruṣo'vyaktaṃ(m), rajaḥ(s) sattvaṃ(n) tamaḥ(ph) param .. 37..

jyoti+ rahaṃ(m)

अहमेतत्प्रसं(ङ्)ख्यानं(ञ्), ज्ञानं(न्) तत्त्वविनिश्चयः ।
मयेश्वरेण जीवेन, गुणेन गुणिना विना ।
सर्वात्मनापि सर्वेण, न भावो विद्यते क्वचित् ॥ 38॥

ahametatprasaṃ(ṅ)khyānaṃ(ñ), jñānaṃ(n) tattvaviniścayaḥ
mayeśvareṇa jīvena, guṇena guṇinā vinā .
sarvātmanāpi sarveṇa, na bhāvo vidyate kvacit .. 38..

aha+ metat+ prasaṃ(ṅ)khyānaṃ(ñ), sarvāt+ manāpi

सं(ङ्)ख्यानं(म्) परमाणूनां(ङ्), कालेन क्रियते मया ।
न तथा मे विभूतीनां(म्), सृजतोऽण्डानि कोटिशः ॥ 39॥

saṃ(ṅ)khyānaṃ(m) paramāṇūnāṃ(ṅ), kālena kriyate mayā .
na tathā me vibhūtīnāṃ(m), sṛjato'ṇḍāni koṭiśaḥ .. 39..

sṛjato'ṇ+ ḍāni

तेजः(श्) श्रीः(ख्) कीर्तिरैश्वर्यं(म्), ह्रीस्त्यागः(स्) सौभगं(म्) भगः ।
वीर्यं(न्) तितिक्षा विज्ञानं(म्), यत्र यत्र स मेंऽ(व्)शकः ॥ 40||

tejaḥ(ś) śrīḥ(kh) kīrtiraiśvaryaṃ(m), hrīstyāgaḥ(s) saubhagaṃ(m) bhagaḥ .
vīryaṃ(n) titikṣā vijñānaṃ(m), yatra yatra sa meṃ'(v)śakaḥ .. 40..

kīrti+ raiśvaryaṃ(m), hrīs+ tyāgaḥ(s)

एतास्ते कीर्तिताः(स्) सर्वाः(स्), सं(ङ्)क्षेपेण विभूतयः ।
मनोविकारा एवैते, यथा वाचाभिधीयते ॥ 41॥

etāste kīrtitāḥ(s) sarvāḥ(s), saṃ(ṅ)kṣepeṇa vibhūtayaḥ .

manovikārā evaite, yathā vācābhidhīyate .. 41..

vācā+ bhidhīyate

वाचं(म्) यच्छ मनो यच्छ, प्राणान् यच्छेन्द्रियाणि च ।

आत्मानमात्मना यच्छ, न भूयः(ख्) कल्पसेऽध्वने ॥ 42॥

vācaṃ(m) yaccha mano yaccha, prāṇān yacchendriyāṇi ca .

ātmānamātmanā yaccha, na bhūyaḥ(kh) kalpase'dhvane .. 42..

yacchen+ driyāṇi, ātmā+ namātmanā

यो वै वाङ्मनसी सम्य- गसं(य्)यच्छन् धिया यतिः ।

तस्य व्रतं(न्) तपो दानं(म्),स्त्रवत्यामघटाम्बुवत् ॥ 43||

yo vai vāṅmanasī saṃya- gasaṃ(y)yacchan dhiyā yatiḥ .

tasya vrataṃ(n) tapo dānaṃ(m), sravatyāmaghaṭāmbuvat .. 43..

sravatyā+ maghaṭām+ buvat

तस्मान्मनोवचः(फ्)प्राणान्, नियच्छेन्मत्परायणः ।

मद्भक्तियुक्तया बुद्ध्या, ततः(फ्) परिसमाप्यते ॥ 44॥

tasmānmanovacaḥ(ph)prāṇān, niyacchenmatparāyaṇaḥ .

madbhaktiyuktayā buddhyā, tataḥ(ph) parisamāpyate .. 44..

tasmān+manovacaḥ(ph)+ prāṇān,

niyacchen+ matparāyaṇaḥ, madbhakti+ yuktayā

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)

सं(व्)हितायामेकादशस्कन्धे षोडशोऽध्यायः ॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)

saṃ(v)hitāyāmekādaśaskandhe ṣoḍaśo'dhyāyaḥ .. 16..

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

**Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|**

**Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||**

**Om Shāntih(ś) Shāntih(ś) Shāntih ||**

